॥ નવગ્રહ જપમન્ત્રાઃ ॥

૧ સૂર્યઃ

અથ સૂર્યમન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીસૂર્યમહામન્ત્રસ્ય હિરણ્યસ્તૂપ ઋષિઃ ।
તૃષ્ટુપ્ છન્દઃ । સૂર્યો દેવતા । ઘૃણિરિતિ બીજમ્ ।
સૂર્ય ઇતિ શક્તિઃ । આદિત્ય ઇતિ કીલકમ્ ।
સૂર્યગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
સૂર્યાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
તેજોમૂર્તયે તર્જનીભ્યાં સ્વાહા ।
વરદાય મધ્યમાભ્યાં વષટ્ ।
હંસાય અનામિકાભ્યાં હુમ્ ।
શાન્તાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
કર્મસાક્ષિણે કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
સૂર્યાય હૃદયાય નમઃ ।
તેજોમૂર્તયે શિરસે સ્વાહા ।
વરદાય શિખાયૈ વષટ્ ।
હંસાય કવચાય હુમ્ ।
શાન્તાય નેત્રત્રયાય વૌષટ્ ।
કર્મસાક્ષિણે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્ ।
ધૃતપદ્મદ્વયં ભાનું તેજોમણ્ડલમધ્યગમ્ ।
સર્વાધિવ્યાધિશમનં છાયાશ્લિષ્ટતનું ભજે ॥ ૧॥

પદ્માસનઃ પદ્મકરો દ્વિબાહુઃ પદ્મદ્યુતિઃ સપ્તતુરઙ્ગવાહઃ ।
દિવાકરો લોકગુરુઃ કિરીટી મયિ પ્રસાદં વિદધાતુ દેવઃ ॥ ૨॥

દ્વિભુજં પદ્મહારં ચ વરદં મકુટાન્વિતમ્ ।
ધ્યાયેદ્દિવાકરં દેવં સર્વાભીષ્ટફલપ્રદમ્ ॥ ૩॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।

રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ આસ॒`ત્યેન॒ રજ॑સા॒ વર્ત॑માનો નિવેશ॑યન્ન॒મૃત॒ં મર્ત્ય॑ં ચ ।
હિ॒રણ્॒યયે॑ન સવિ॒તારથે॒નાદે॒વો યા॑તિ॒ ભુવ॑નાવિ॒પશ્યન્॑ ।
(યથાશક્તિ જપેત્)
સૂર્યાય હૃદયાય નમઃ ।
તેજોમૂર્તયે શિરસે સ્વાહા ।
વરદાય શિખાયૈ વષટ્ ।
હંસાય કવચાય હુમ્ ।
શાન્તાય નેત્રત્રયાય વૌષટ્ ।
કર્મસાક્ષિણે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્ ।
ધૃતપદ્મદ્વયં ભાનું તેજોમણ્ડલમધ્યગમ્ ।
સર્વાધિવ્યાધિશમનં છાયાશ્લિષ્ટતનું ભજે ॥ ૧॥

પદ્માસનઃ પદ્મકરો દ્વિબાહુઃ પદ્મદ્યુતિઃ સપ્તતુરઙ્ગવાહઃ ।
દિવાકરો લોકગુરુઃ કિરીટી મયિ પ્રસાદં વિદધાતુ દેવઃ ॥ ૨॥

દ્વિભુજં પદ્મહારં ચ વરદં મકુટાન્વિતમ્ ।
ધ્યાયેદ્દિવાકરં દેવં સર્વાભીષ્ટફલપ્રદમ્ ॥ ૩॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ શ્રીસૂર્યમહામન્ત્રઃ

## ૨ ચન્દ્રઃ

અથ સોમમન્ત્રપ્રારંભઃ

ૐ અસ્ય શ્રીસોમમહામન્ત્રસ્ય ગૌતમ ઋષિઃ । ગાયત્રી છન્દઃ ।
સોમો દેવતા । સાં બીજમ્ । સીં શક્તિઃ । સૂં કીલકમ્ ।
મમ શ્રીસોમગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
સોમાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
નિશાકરાય તર્જનીભ્યાં સ્વાહા ।
ક્ષીરોદાર્ણવસંભવાય મધ્યમાભ્યાં વષટ્ ।
લક્ષ્મીસહોદરાય અનામિકાભ્યાં હુમ્ ।
તારકેશાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
સુધામૂર્તયે કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
સોમાય હૃદયાય નમઃ ।
નિશાકરાય શિરસે સ્વાહા ।
ક્ષીરોદાર્ણવસંભવાય શિખાયૈ વષટ્ ।
લક્ષ્મીસહોદરાય કવચાય હુમ્ ।
તારકેશાય નેત્રત્રયાય વૌષટ્ ।
સુધામૂર્તયે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃ સુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
ગદાધરધરં દેવં શ્વેતવર્ણં નિશાકરમ્ ।
ધ્યાયેદમૃતસંભૂતં સર્વકામફલપ્રદમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ આપ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણિયમ્ ।
ભવા વાજસ્ય સઙ્ગથે ॥

(યથાશક્તિ જપેત્)
સોમાય હૃદયાય નમઃ ।
નિશાકરાય શિરસે સ્વાહા ।
ક્ષીરોદાર્ણવસંભવાય શિખાયૈ વષટ્ ।
લક્ષ્મીસહોદરાય કવચાય હુમ્ ।
તારકેશાય નેત્રત્રયાય વૌષટ્ ।
સુધામૂર્તયે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનં
ગદાધરધરં દેવં શ્વેતવર્ણં નિશાકરમ્ ।
ધ્યાયેદમૃતસંભૂતં સર્વકામફલપ્રદમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ સોમમન્ત્રઃ

## ૩ અઙ્ગારકઃ

અથ અઙ્ગારકમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીઅઙ્ગારકમહામન્ત્રસ્ય વિરૂપાક્ષ ઋષિઃ ।
ગાયત્રી છન્દઃ । અઙ્ગારકો દેવતા ।
મમ શ્રીઅઙ્ગારકગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
અઙ્ગારકાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ધરણીસુતાય તર્જનીભ્યાં નમઃ ।
રક્તવાસસે મધ્યમાભ્યાં નમઃ ।
રક્તલોચનાય અનામિકાભ્યાં નમઃ ।
શક્તિધરાય કનિષ્ઠિકાભ્યાં નમઃ ।

કર્મભાવનાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
અઙ્ગારકાય હૃદયાય નમઃ ।
ધરણીસુતાય શિરસે સ્વાહા ।
રક્તવાસસે શિખાયૈ વષટ્ ।
રક્તલોચનાય કવચાય હુમ્ ।
શક્તિધરાય નેત્રત્રયાય વૌષટ્ ।
કર્મભાવનાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
રક્તમાલ્યાંબરધરં હેમરૂપં ચતુર્ભુજમ્ ।
શક્તિરૂપં ગદાપદ્મં ધારયન્તં કરાંબુજૈઃ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ અ॒ગ્નિર્મૂ॒ર્ધા દિ॒વઃ ક॒કુત્પતિઃ॑ પૃથિ॒વ્યા અ॒યમ્ ।
અ॒પાꣳ રેતાꣳ॑સિ જિન્વતિ ॥

(યથાશક્તિ જપેત્)
અઙ્ગારકાય હૃદયાય નમઃ ।
ધરણીસુતાય શિરસે સ્વાહા ।
રક્તવાસસે શિખાયૈ વષટ્ ।
રક્તલોચનાય કવચાય હુમ્ ।
શક્તિધરાય નેત્રત્રયાય વૌષટ્ ।
કર્મભાવનાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
રક્તમાલ્યાંબરધરં હેમરૂપં ચતુર્ભુજમ્ ।
શક્તિરૂપં ગદાપદ્મં ધારયન્તં કરાંબુજૈઃ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ અઙ્ગારકમહામન્ત્રઃ

## ૪ બુધઃ

અથ બુધમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીબુધમહામન્ત્રસ્ય મધુચ્છન્દ ઋષિઃ । તૃષ્ટુપ્છન્દઃ ।
બુધો દેવતા । બુધપ્રીત્યર્થે જપે વિનિયોગઃ ।
બુધાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
સૌમ્યાય તર્જનીભ્યાં નમઃ ।
સિંહારૂઢાય મધ્યમાભ્યાં નમઃ ।
ચતુર્બાહવે અનામિકાભ્યાં નમઃ ।
ગદાધરાય કનિષ્ઠિકાભ્યાં નમઃ ।
સોમપુત્રાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
બુધાય હૃદયાય નમઃ ।
સૌમ્યાય શિરસે સ્વાહા ।
સિંહારૂઢાય શિખાયૈ વષટ્ ।
ચતુર્બાહવે કવચાય હુમ્ ।
ગદાધરાય નેત્રત્રયાય વૌષટ્ ।
સોમપુત્રાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
પીતાંબરઃ પીતવપુઃ કિરીટી ચતુર્ભુજો દણ્ડધરશ્ચ સૌમ્યઃ ।
ચર્માસિધૃત્ સોમસુતઃ સદા મે સિંહાધિરૂઢો વરદો બુધઃ સ્યાત્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।

હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ ઉદ્બુ॑ધ્યસ્વાગ્ને॒ પ્રતિ॑જાગૃહ્યેનમિષ્ટાપૂ॒ર્તે
સ॒ꣳસૃ॑જેથામ॒યં ચ॑ ।
પુનઃ॑ કૃ॒ણ્વꣳસ્ત્વા॑ પિ॒તરં॒ યુવા॑નમ॒ન્વાતાꣳ॑સી॒ત્ત્વયિ॒
તન્તુ॑મે॒તમ્ ॥

(યથાશક્તિ જપેત્)
બુધાય હૃદયાય નમઃ ।
સૌમ્યાય શિરસે સ્વાહા ।
સિંહારૂઢાય શિખાયૈ વષટ્ ।
ચતુર્બાહવે કવચાય હુમ્ ।
ગદાધરાય નેત્રત્રયાય વૌષટ્ ।
સોમપુત્રાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
પીતાંબરઃ પીતવપુઃ કિરીટી ચતુર્ભુજો દણ્ડધરશ્ચ સૌમ્યઃ ।
ચર્માસિધૃત્ સોમસુતઃ સદા મે સિંહાધિરૂઢો વરદો બુધઃ સ્યાત્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ બુધમહામન્ત્રઃ

૫ બૃહસ્પતિઃ

અથ બૃહસ્પતિમન્ત્રપ્રારંભઃ

ૐ અસ્ય શ્રીબૃહસ્પતિમહામન્ત્રસ્ય ગૃત્સ મહર્ષિઃ । જગતીછન્દઃ ।
બૃહસ્પતિર્દેવતા । બૃહસ્પતિપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ગુરવે અઙ્ગુષ્ઠાભ્યાં નમઃ ।
વાક્પતયે તર્જનીભ્યાં નમઃ ।
ગીર્વાણવન્દિતાય મધ્યમાભ્યાં નમઃ ।
વરદાય અનામિકાભ્યાં નમઃ ।
સુરાચાર્યાય કનિષ્ઠિકાભ્યાં નમઃ ।
કમણ્ડલુધરાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ગુરવે હૃદયાય નમઃ ।
વાક્પતયે શિરસે સ્વાહા ।
ગીર્વાણવન્દિતાય શિખાયૈ વષટ્ ।
વરદાય કવચાય હુમ્ ।
સુરાચાર્યાય નેત્રત્રયાય વૌષટ્ ।
કમણ્ડલુધરાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
વરાક્ષમાલિકાદણ્ડકમણ્ડલુધરં વિભુમ્ ।
પુષ્પરાગાઙ્કિતં પીતં વરદં ભાવયેદ્ગુરુમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ બૃહ॑સ્પતે॒ અતિ॒યદ॒ર્યો અર્હા॑દ્દ્યુમદ્વિ॒ભાતિ॒
ક્રતુ॑મ॒જ્જને॑ષુ ।
યદ્દી॒દય॒ચ્છવ॑સર્તપ્રજાત॒ તદ॒સ્માસુ॒ દ્રવિ॑ણં
ધેહિ ચિ॒ત્રમ્ ॥

(યથાશક્તિ જપેત્)

ગુરવે હૃદયાય નમઃ ।
વાક્પતયે શિરસે સ્વાહા ।
ગીર્વાણવન્દિતાય શિખાયૈ વષટ્ ।
વરદાય કવચાય હુમ્ ।
સુરાચર્યાય નેત્રત્રયાય વૌષટ્ ।
કમણ્ડલુધરાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
વરાક્ષમાલિકાદણ્ડકમણ્ડલુધરં વિભુમ્ ।
પુષ્પરાગાઙ્કિતં પીતં વરદં ભાવયેદ્ગુરુમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ બૃહસ્પતિમન્ત્રઃ

## ૬ શુક્રઃ

અથ શુક્રમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીશુક્રમહામન્ત્રસ્ય ભરદ્વાજ ઋષિઃ ।
ત્રિષ્ટુપ્છન્દઃ । શુક્રો દેવતા ।
મમ શ્રીશુક્રગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
દાનવપૂજિતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
દૈત્યાચાર્યાય તર્જનીભ્યાં નમઃ ।
વરદાય મધ્યમાભ્યાં નમઃ ।
શ્વેતવસ્ત્રાય અનામિકાભ્યાં નમઃ ।
શુક્રાય કનિષ્ઠિકાભ્યાં નમઃ ।

કમણ્ડલુધરાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
દાનવપૂજિતાય હૃદયાય નમઃ ।
દૈત્યાચાર્યાય શિરસે સ્વાહા ।
વરદાય શિખાયૈ વષટ્ ।
શ્વેતવસ્ત્રાય કવચાય હુમ્ ।
શુક્રાય નેત્રત્રયાય વૌષટ્ ।
કમણ્ડલુધરાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
જટિલં ચાક્ષસૂત્રં ચ વરદણ્ડકમણ્ડલુમ્ ।
શ્વેતવસ્ત્રોજ્જ્વલં શુક્રં સર્વદાનવપૂજિતમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ પ્રવઃ॑ શુ॒ક્રાય॑ ભા॒નવે॑ ભરધ્વઁ હ॒વ્યમ્
મ॒તિં ચા॒ગ્નયે॒ સુપૂ॑તમ્ ।
યો દૈવ્યા॑નિ॒ માનુ॑ષા જનૂઁષ્ય॒ન્તર્વિશ્વા॑નિ
વિ॒દ્મના॒ જિગા॑તિ ॥

અથવા
ૐ શુ॒ક્રં તે॑ અ॒ન્યદ્ ય॑જ॒તન્તે॑ અ॒ન્યદ્વિ॒ષુ॑રૂપે॒
અહ॑ની॒દ્યૌરિ॑વાસિ ।
વિશ્વા॒ હિ મા॒યા અવ॑સિ સ્વધા વો ભ॒દ્રા તે॑
પૂષન્નિ॒હરા॒તિર॑સ્તુ ॥

(યથાશક્તિ જપેત્)
દાનવપૂજિતાય હૃદયાય નમઃ ।
દૈત્યાચાર્યાય શિરસે સ્વાહા ।

વરદાય શિખાયૈ વષટ્ ।
શ્વેતવસ્ત્રાય કવચાય હુમ્ ।
શુક્રાય નેત્રત્રયાય વૌષટ્ ।
કમણ્ડલુધરાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
જટિલં ચાક્ષસૂત્રં ચ વરદણ્ડકમણ્ડલુમ્ ।
શ્વેતવસ્ત્રોજ્જ્વલં શુક્રં સર્વદાનવપૂજિતમ્ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ શુક્રમહામન્ત્રઃ

## ૭ શનૈશ્ચરઃ

અથ શનૈશ્ચરમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીશનૈશ્ચરમહામન્ત્રસ્ય ઉરુમિત્ર ઋષિઃ ।
ગાયત્રીછન્દઃ । શનૈશ્ચરો દેવતા ।
મમ શ્રીશનૈશ્ચરગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
શનૈશ્ચરાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
મન્દગતયે તર્જનીભ્યાં નમઃ ।
અધોક્ષજાય મધ્યમાભ્યાં નમઃ ।
સૌરયે અનામિકાભ્યાં નમઃ ।
અભયઙ્કરાય કનિષ્ઠિકાભ્યાં નમઃ ।
ઊર્ધ્વરોમ્ણે કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
શનૈશ્ચરાય હૃદયાય નમઃ ।
મન્દગતયે શિરસે સ્વાહા ।
અધોક્ષજાય શિખાયૈ વષટ્ ।

સૌરયે કવચાય હુમ્ ।
અભયઙ્કરાય નેત્રત્રયાય વૌષટ્ ।
ઊર્ધ્વરોમ્ણે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
નીલામ્બરો નીલવપુઃ કિરીટી ગૃધ્રસ્થિતસ્ત્રાસકરો ધનુષ્માન્ ।
ચતુર્ભુજઃ સૂર્યસુતઃ પ્રશાન્તઃ સદાસ્તુ મહ્યં વરદઃ પ્રસન્નઃ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ શં નો᳚ દે॒વીર॒ભિષ્ટ॑ય॒ આપો᳚ ભવન્તુ પી॒તયે᳚ ।
શં યોર॒ભિસ્ર॑વન્તુ નઃ ।
(યથાશક્તિ જપેત્)
શનૈશ્ચરાય હૃદયાય નમઃ ।
મન્દગતયે શિરસે સ્વાહા ।
અધોક્ષજાય શિખાયૈ વષટ્ ।
સૌરયે કવચાય હુમ્ ।
અભયઙ્કરાય નેત્રત્રયાય વૌષટ્ ।
ઊર્ધ્વરોમ્ણે અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
નીલામ્બરો નીલવપુઃ કિરીટી ગૃધ્રસ્થિતસ્ત્રાસકરો ધનુષ્માન્ ।
ચતુર્ભુજઃ સૂર્યસુતઃ પ્રશાન્તઃ સદાસ્તુ મહ્યં વરદઃ પ્રસન્નઃ ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।

વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ શનૈશ્ચરમહામન્ત્રઃ

## ૮ રાહુઃ

અથ રાહુમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીરાહુમહામન્ત્રસ્ય વામદેવ ઋષિઃ । ગાયત્રીછન્દઃ ।
રાહુર્દેવતા । રાહુપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ધૂમ્રવર્ણાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
કરાળવદનાય તર્જનીભ્યાં નમઃ ।
ખણ્ડવરાય મધ્યમાભ્યાં નમઃ ।
મહાશૂરાય અનામિકાભ્યાં નમઃ ।
ત્રિશૂલધરાય કનિષ્ઠિકાભ્યાં નમઃ ।
નીલસિંહાસનસ્થાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ધૂમ્રવર્ણાય હૃદયાય નમઃ ।
કરાળવદનાય શિરસે સ્વાહા ।
ખણ્ડવરાય શિખાયૈ વષટ્ ।
મહાશૂરાય કવચાય હુમ્ ।
ત્રિશૂલધરાય નેત્રત્રયાય વૌષટ્ ।
નીલસિંહાસનસ્થાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
કરાળવદનં ખડ્ગચર્મશૂલવરાન્વિતમ્ ।
નીલસિંહાસનં રાહું ધ્યાયેદ્રોગપ્રશાન્તયે ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ કયાંન્શ્ચિત્ર આભુંવદૂતી સુદાવૃંધુસ્સખાં ।
કયા શચિંષ્ઠયા વૃતા ॥

(યથાશક્તિ જપેત્)
ધૂમ્રવર્ણાય હૃદયાય નમઃ ।
કરાળવદનાય શિરસે સ્વાહા ।
ખણ્ડવરાય શિખાયૈ વષટ્ ।
મહાશૂરાય કવચાય હુમ્ ।
ત્રિશૂલધરાય નેત્રત્રયાય વૌષટ્ ।
નીલસિંહાસનસ્થાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
કરાળવદનં ખડ્ગચર્મશૂલવરાન્વિતમ્ ।
નીલસિંહાસનં રાહું ધ્યાયેદ્રોગપ્રશાન્તયે ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ રાહુમહામન્ત્રઃ

૯ કેતુઃ
અથ કેતુમહામન્ત્રપ્રારંભઃ
ૐ અસ્ય શ્રીકેતુમહામન્ત્રસ્ય મયચ્છન્દ ઋષિઃ ।
ગાયત્રી છન્દઃ । કેતુર્દેવતા ।
મમ શ્રીકેતુગ્રહપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ધૂમ્રવર્ણય અઙ્ગુષ્ઠાભ્યાં નમઃ ।

દ્વિબાહવે તર્જનીભ્યાં નમઃ ।
કેતવે મધ્યમાભ્યાં નમઃ ।
વિકૃતાનનાય અનામિકાભ્યાં નમઃ ।
ગૃધ્રાસનાય કનિષ્ઠિકાભ્યાં નમઃ ।
લંબકાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ધૂમ્રવર્ણાય હૃદયાય નમઃ ।
દ્વિબાહવે શિરસે સ્વાહા ।
કેતવે શિખાયૈ વષટ્ ।
વિકૃતાનનાય કવચાય હુમ્ ।
ગૃધ્રાસનાય નેત્રત્રયાય વૌષટ્ ।
લંબકાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ।
ધ્યાનમ્
ધૂમ્રવર્ણં દ્વિબાહું ચ કેતું ચ વિકૃતાનનમ્ ।
ગૃધ્રાસનં ગતં નિત્યં ધ્યાયેત્સર્વફલાપ્તયે ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

મૂલમન્ત્રઃ
ૐ કે॒તું કૃ॒ણ્વન્ન॑કે॒તવે॒ પેશો॑ મર્યા અપે॒શસે॑ ।
સ મુ॒ષદ્ભિ॑રજાયથાઃ ॥

(યથાશક્તિ જપેત્)
ધૂમ્રવર્ણાય હૃદયાય નમઃ ।
દ્વિબાહવે શિરસે સ્વાહા ।
કેતવે શિખાયૈ વષટ્ ।
વિકૃતાનનાય કવચાય હુમ્ ।
ગૃધ્રાસનાય નેત્રત્રયાય વૌષટ્ ।
લંબકાય અસ્ત્રાય ફટ્ ।

BACK TO TOP

ભૂર્ભુવઃસુવરોમિતિ દિગ્વિમોકઃ ।
ધ્યાનમ્
ધૂમ્રવર્ણં દ્વિબાહું ચ કેતું ચ વિકૃતાનનમ્ ।
ગૃધ્રાસનં ગતં નિત્યં ધ્યાયેત્સર્વફલાપ્તયે ॥

લં પૃથિવ્યાત્મને ગન્ધં સમર્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ સમર્પયામિ ।
યં વાય્વાત્મને ધૂપમાઘ્રાપયામિ ।
રં વહ્ન્યાત્મને દીપં દર્શયામિ ।
વં અમૃતાત્મને અમૃતોપહારં નિવેદયામિ ।
સં સર્વાત્મને સર્વોપચારાન્ સમર્પયામિ ॥

ઇતિ કેતુમહામન્ત્રઃ